इ०पु०४०८

गुरुवृत्तम्

टीकाराम पन्थी

भारतीय-साहित्य-ग्रन्थमालायाः सप्तदशं पुष्पम्

रघुवृत्तम्

बालबोधि विद्यार्थीहु प्रयोजनार्थ
लाग्ने उद्देश्यले
— लेखक

लेखकः

टीकाराम पन्थी

भाडगाउँ, गुल्मी, नेपाल,

व्याकरणाध्यापकः

नेपाली संस्कृतमहाविद्यालयः

वाराणसी,

प्रकाशकः
भेषराज उपाध्याय,
गुल्मी, भाड़गाउँ नेपाल,

मुद्रकः
सूरज प्रसाद गुप्त,
राजेश प्रिंटिंग वर्क्स,
त्रिलोचनघाट, वाराणसी ।

सर्वेऽधिकाराः सुरक्षिताः

प्रथमं संस्करणम् १०००
२०२१, महाशिवरात्रिः
मूल्यमेकरूप्यकम्

किञ्चित्प्रास्ताविकम्

जयन्तु ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशः काये जरामरणजं भयम् ॥

विदितचरमेवास्ति समेषां विदुषां यत् प्राणिमात्रं सरलतापूर्वकम् अधिकादधिकं सुखमेवाभिकाङ्क्षति निरन्तरम् । चतुर्वर्गप्रयोजकस्य सहृदयहृदयाह्लादकस्य सत्काव्यस्य निषेवणादेव अनायासेन सर्वेष्टसिद्धिः प्रजायते ।

काव्यं हि धर्मार्थिभ्यो धर्मं कामार्थिभ्यः काममर्थार्थिभ्योऽर्थं शूरेभ्यः साहसं दुःखिभ्यः शान्तिं शोकार्त्तेभ्यो विश्रान्तिं विद्वद्भ्यो वैदुष्यमज्ञेभ्यश्च ज्ञानं प्रयच्छति ।

व्यास-वाल्मीकि-भास-कालिदास-बाण-माघ-भारवि-श्रीहर्षप्रभृतीनां काव्यनिर्मातृणाममरतासम्पादकं काव्यमेवास्ति ।

काव्यं हि ब्रह्मानन्दसहोदरत्वाच्छालग्रामशिलावदनन्तब्रह्माण्डनायकस्य भगवतः प्रतीकं यस्य हृदयान्निःसरति सोऽवश्यमभिनन्दनीयः कविः ।

यथा हिमालयवर्तिनो मानसरोवरान्निःसृत्यविभिन्नानि स्रोतांसि जगत्प्लावयन्ति तथैव पुराणवाङ्मयान्निर्गतानि अनेकानि महाकाव्यानि भृशमानन्दयन्ति सहृदयहृदयानि । आदिकालतः प्रचलितामिमां परम्परां पुष्टीकर्त्तुं नेपाले लब्धजन्मना प्रतिभाशालिना शीलसौजन्यमूर्तिना श्रीमता 'टीकाराम पन्थी' महोदयेन वाराहपुराणीयं रुरुचरितमाधारीकृत्य लघुकलेवरमपि

विशालवैभवं भावपूर्णं मनोहरं रुरुवृत्तमिदं समुपस्थाप्य महतोऽभावस्य पूर्तिः कृता।

अस्य मधुरा रचना समुचितं पदसौष्ठवं विविधालङ्कारविन्यासचातुरी श्लेष-समाश्लेषकौतुकं पूज्येषु श्रद्धातिशयश्च कस्य सहृदयस्य हृदयं न चमत्कर्तुं प्रभवति।

अतिरोहितमेतत् कस्यापि स्वसंस्कृते गौरवाधायिनो नेपालोयस्य यद् रुरुक्षेत्रं नेपालस्य हृदयस्थानीयं परमपूतं तीर्थस्थानम्। वाराहपुराणे १४६ अध्याये गण्डकीतीरसंबद्ध-पुण्यक्षेत्रवर्णनप्रसंगे देवदत्तस्य, रुरोः तत्क्षेत्रस्य च मनोहरं वर्णनं कृतमस्ति, देवदत्तस्यायुतवर्षपर्यन्तं हिमालये (तत्रैव रुरुक्षेत्रे) तपश्चर्या, ततो भीतेन सुरपतिना प्रम्लोचाप्सरसः प्रेषणम्, तया तपस्विनो मुनेस्तपो भङ्गः, पश्चात्प्रबुद्धेन तेन भृगुतुङ्गं गत्वा शिवस्याराधना, ततो ज्ञानं प्राप्य शिवसायुज्यलाभः। इतश्च देवदत्तसंबन्धात् कन्यां प्रसूय तत्रैव तां परित्यज्य च प्रम्लोचायाः स्वर्गे गमनम्, दयया रुरुभिस्तस्या बालायाः पालितत्वात् रुरुनामिकायाः यौवनमनुभवन्त्या अपि विषयव्यावृत्तायास्तस्या अपि तपसि प्रवृत्तिः। तत्तपसा संतुष्टस्य भगवतो विष्णोः तस्यै वरप्रदानपूर्वकं तत्प्रार्थनया हृषीकेशनाम्ना तत्रस्थितिप्रतिज्ञा। परन्त्वेतादृशमहत्वपूर्णविषये सर्वजनसौलभ्याय पुराणादितो बहिरपि काव्यादेर्महती आवश्यकता, यतो ऽधिकाधिकसंख्यायां जना लाभान्विता भवन्तु इति प्रथमं प्रस्तुतप्रबन्धकाव्ये लेखनी-संचालनस्य निदानम्।

अपि च लोककल्याणनिरताः संसारविरक्ता अपि महापुरुषाः स्वकर्मणा भाविसन्ततिभ्योऽमूल्यं श्रेयः साधनोभूतं किमपिरत्नं प्रदाय सायुज्यं भजन्ते। तेषां दैवात् कारणान्तरेण सञ्जायमानमपि विरुद्धाचरणं विश्वजनहितायैव भवति। अत एव विश्वा-

मित्रात् मेनकायां समुत्पन्नायाः शकुन्तलाया गर्भाज्जातस्य राजर्षिभरतस्यानुपमं चरित्रं लोककल्याणकरमेव मन्यन्ते मान्याः।

एवञ्च पूर्वं राज्ञे नीतिमार्गोपदेशकस्य लोककल्याणकारिणो देवदत्तस्य तपोभङ्गोऽपि तपस्विन्या रुरुकन्यायाः उत्पादात् लोकहितायैवाभूत्, अन्यथा तत्र भगवतो हृषीकेशस्य सान्निध्यं दुर्लभं स्यात्। रुरुकन्यायाः प्रभावादेव सन्निहितस्य भगवतो हृषीकेशस्योपासनावसरः प्राणिमात्रस्य महते फलाय स्थिरीभूतः।

तथा चात्रैव प्रथमभागे—

एका तपस्या भुवनावनाय
कैवल्यसँल्लाभकरी द्वितीया।
मनोरथान् पूर्णफलान् प्रकृष्टान्
जानीहि वत्सोभयतः ऋणेऽस्मिन्॥ श्लोक ७२

इत्यादि वस्तुजातमभिसन्धाय सर्वजनसौलभ्याय काव्यप्रणयने कवेः प्रवृत्तिरत्यन्तं श्लाघ्यतमा।

अत्र कविनाऽनेन नवीनरूपेण परिवर्तनपरिवर्धनादिभिः अभिनवाऽऽकर्षतोद्भाविता। अत्रादर्शभूता अनेके विषया अपि निवेशिताः सन्ति, यथा देवदत्तस्य तपोवनगमनात् प्राक्तनी सैद्धान्तिकी सोदाहरणा च कथा प्राचीनां लोकस्पृहणीयां राज्यकार्यप्रणालीं विद्वत्समादरञ्च दर्शयति। देवदत्तस्य प्रम्लोचया सह आद्यन्तयोः समानः प्रेमात्मकः सम्बन्धः, मुमुक्षोरपि देवदत्तस्य आशुतोषाद् भगवतः शङ्कराल्लोकहितविषयकवरयाचनम्, शिवस्य देवदत्तेन, रुरुकन्यायाः रुरुभिः, हरेस्तपस्विन्या रुरुकन्यकया च सँल्लापाः, प्रम्लोचया परित्यक्तां नवजातबालां विलोक्य रुरुणां तर्कश्चेत्यादयो विषया विलक्षणतया समुद्भाविताः सन्ति।

अत्र भाषा सरला, सरसो लघुसमासपदविन्यासश्च। अनुप्रास-रूपकयमकोपमार्थान्तरन्यासप्रभृतयोऽलङ्कारा यत्र तत्र निवेशिताः सन्ति । मन्दाक्रान्ता-वसन्ततिलका-पुष्पिताग्रा-वंशस्थप्रभृतीनां छन्दसां प्रयोगो विद्यते।

स्वदेश-राष्ट्र-जाति-संस्कृति-सभ्यतागौरवेण मण्डलप्रेमातिशयेन स्थानसमादरेण च समाकृष्टचेतसः सचेतसः कवेरयं प्रथमः प्रयासोऽत्यन्तं श्लाघ्यो हृद्योऽनुकरणीय उपादेयश्चास्ति। कविता-माधुरी-धुरीणाः काव्य-कला-प्रवीणा वीणापाणिसमाराधन-सरसहृदयाः सहृदयाः काचित्कीं सम्भाव्यमानां दोषदृष्टिं परिहायाभिनवमिदं लघुकाव्यं समादृत्य कवेरुद्देश्यमवश्यं सफलयिष्यन्तीत्याशासानः कविं हृदयेनाभिनन्दयामि—

वाणीविलासरसरञ्जितभावपूर्णं
लोकांश्चमत्कृतिमतः सरसान् वितन्वत्।
काव्यं तपस्विरुरुवृत्तमुदारभावं
सन्मानसं सुमनसां मुदितं विदध्यात्।

बालत्व एव गुरवः प्रतिभा-प्रभावाद्
यं मन्वते श्रुतिधरं सुकुशाग्रबुद्धिम्।
साहित्यकैरवविकासपरो विपश्चित्
सोऽयं चिरञ्जयतु देशहिताय सूरिः।

महाशिवरात्रिः
२०२१

श्रीकृष्णमणित्रिपाठी
व्याख्याता—
वाराणसेयसंस्कृतविश्वविद्यालस्य
वाराणस्याम्

समर्पणम्

श्रुतिस्मृतिपुराणोपपुराणानुशीलनशीलानां वानप्रस्थाश्रमावलम्बनपूर्वकमधिनेपालं रेसुंगागिरिपादान्तर्गतपर्णशालामधिवसतामनुदिनशिवलिङ्गसहस्रार्चनपरायणानां पूज्यपादपङ्केरुहाणां शीलसौजन्यानुरागमूर्तीनां तातपादानां श्रीमतां मुक्तिरामोपाध्याय महाभागानां करकमलयो स्तदीयनिर्बन्धनिबद्धमप्रस्फुटितवाग्विभववालसुलभप्रस्खलद्वाक्यविन्यासमदो रुरुवृत्तं सादरं सबहुमानञ्च समर्पयते

टीकाराम पन्थी,

२०२१, महाशिवरात्रिः

गुरुवृत्तम्

प्रथमो भागः

आसीत् कश्चिद् भृगुकुलजनिः स्नेहसौजन्यमूर्ति–
र्विप्रो भूमौ सुरगुरुसमः सर्वभूतोपजीव्यः ।
अत्रत्यानामवनविधये प्राणिनां दुःखभाजां
देवैर्दत्तोऽयमिति यमिहाचख्यिरे देवदत्तम् ॥

१

नेपालेऽस्मिन् सुरमुनिगणैः सेविते मेध्यदेशे
दीर्घं कालं स समधिवसन् ब्रह्मचर्यं निषेव्य ।
प्राप्तः पारे-निगमजलधि प्रज्ञयाऽनन्यवृत्त्या
विद्वद्वृन्दैः प्रहितिमितया भार्गवो भूसुरेशः ॥

२

प्रत्यायातं गुरुभवनतः प्रौढतारुण्यवन्तं
भास्वत्कान्ति कमलनयनं दृश्यसौन्दर्यराशिम् ।
मुग्धाः कन्या द्विजकुलभवा लालसासंविलासाः
बंहीयस्यो हृदयकमले षट्पदीचक्रुरेनम् ॥

३

"अस्मान्नासौ परिणयति हा ! क्षत्रजाता विवर्णा
वामं दैवं धरणिपतिजा वञ्चयेद् वामनेत्राः ?" ।
जातिश्रेणी दृढवृतिमपध्वंसितुं नालमेवं
दुःखाक्रान्ता रुरुदुरिव तं भूपकन्या विलोक्य ।।

४

संप्राप्तानां प्रतिदिनमथ स्वालये कूकुदानां
नम्राः कम्राश्चपलनयनाः कन्यका रोदयन् सः ।
प्रत्याचख्यौ परिणयविधिं प्रेरितोऽप्याप्तवर्गैः
शान्तात्मानो भवसलिलधिं गाहमाना न शस्ताः ।।

५

पित्रोःक्षिप्रं त्रिदशपदवीं यातयोर्देवदत्तो
लोकायत्तां सृतिमनुसरन् दुःखिनं स्वञ्चकार ।
मुक्तो गेहात् कतिपयसमा आश्रितो राजधानीं
न्याय्यां नीतिं जनहितकरीं निर्दिदेश क्षितीशान् ।।

६

काले याते कियतिचिदथो वक्रदिष्टप्रदिष्टः
प्रादुर्भूतः किल विमतिमा लोकतत्पालमध्ये ।
दारिद्र्यार्त्ता नृपतिबलिना भूयसाऽऽस्यमानाः
सोरस्ताडं सजलनयनाः सँल्लुठन्ति स्म मर्त्याः ।।

प्रावर्तन्त स्वजनभरणे लुण्ठका निर्धनाना–
मायव्याजान्नृरुधिरभुजः शासकाकारहिंस्राः ।
न्यायाधीशा नगरपतयस्तत्सहायाः समस्ता
न्यायञ्चक्रुः प्रचुरमुपदाराशिमादाय तेभ्यः ॥

८

एवंवृत्ते कलुषितनये निर्दये शास्तृवर्गे
भूपम्मन्ये प्रतिजनपदं शिष्टिगैशिष्ट्यगर्वात् ।
क्षोभाविष्टो विकलकरणो देवदत्तः सभायां
नेपालीयं किमपि विगतं वृत्तमेतद् बभाषे ॥

९

"मारीचः कश्चन मुनिरभूदत्र पूर्वः पुमान् 'ने'–
नामा दान्तो द्विजकुलगुरु र्ब्रह्मतेजोविभूतिः ।
सोऽयं श्रेयोधिगममगणोऽवाप्य शैलाधिराजं
प्रत्यावृत्तो बहुलदिवसै र्योगिनीं तोषयित्वा ॥

१०

आचक्राम प्रकृतिनृपतीन् यर्हि दुर्भिक्षबाधा
हाहाकारैरनशनभवै र्याम्ययात्रा प्रवृद्धा ।
देशश्चैष प्रकृतमुनिना पालितोऽभूत्तदानीं
नेपालाख्यः समजनि ततो नेमुनेः कीर्तिसाक्षी ॥

११

यद्यप्यासन्नवनिपतयः क्षत्रियाः शूरवीराः
पारम्पर्याहितवसुमती-भारसञ्जातमानाः ।
किन्ते कुर्युं र्मदनदहनज्ज्वालया दग्धदेहा
मग्नप्रायास्तरुणरमणोमार्गणे न प्रजार्थे ।।

१२

ऊर्वीपाले भवति जनता-प्रेमिणि न्यायशीले
नीतिः शुद्धा सरलसफला सर्वदा संभवेत्किम् ? ।
सर्वो भारः प्रकृतिनिहितः शासकीयोऽदसोयो
भ्रष्टाचारा यदि च परिषत् किं विदध्यान्महीशः ।।

१३

नीचस्वार्थे स्वगतनियमानेयसंबन्धवादे
हित्वा भित्वा प्रचलनपरे सन्नयं राजकीयम् ।
गर्ह्योत्कोचप्लवनिगरणव्यात्तदुर्दर्शवक्रे
मन्त्रिग्रामद्विरसनकुले स्वामिखेलापि खेटा ।।

१४

एवंदोषैरतिगतनयं शासनं नेऽनुकम्पा
भूयो भूयः समधवलयत्कापथोन्मूलनेन ।
तादृक्पन्था अधिकृतजनैराश्रितोऽद्यापि सर्वे
रोरुद्यन्ते भृशविनिहता मानुषीभि र्विपद्भिः ।।

१५

शास्त्रज्ञान-प्रभवविभवाऽशोधितामोघवाचां
ब्रह्मर्षीणां महितमहसां ध्वस्तकामाद्यरीणाम् ।
साङ्गाद् वेदात्सदुपनिषदो गम्यमानार्थसारे
निर्द्देशे स्म प्रचलतितमां राज्यभारो गरिष्ठः ॥

१६

उच्चा, निम्ना, द्विविधपरिषद् निम्नसंसत्सदस्या
अष्टौ वीरा अपरसमिति संश्रितौ द्वौ महर्षी ।
प्रस्तौत्येका सुघटितविधिं, निश्चिनोति द्वितीया,
पश्चाद्राज्ञोऽभ्युमगम, इयं रामराज्यप्रणाली ॥

१७

बालौ सूनू कुशिकतनयप्रार्थनायां प्रदातुं
प्राक्कैकेय्या वचनविततेर्यौवराज्याभिषेके ।
रामस्यैवं, दशरथनृपो बाधितः प्रीतिमान् वा
सन्नद्धोऽभूत्परिषदधिपादेशनिर्द्दिष्टकृत्यः ॥

१८

चापग्राही भुजबलधरो मेदिनीशः प्रजानां
त्राता शस्तः ससचिवबलो भौतिकापन्निरासी ।
छन्दोज्ञानां शमदमवतां तापसानामृषीणा–
मन्तः शक्तिर्द्विविधविपदापाततो रक्षयित्रो ॥

१९

संगृह्णाने भृतिमपि पदे राजकीये नियुक्ते
विद्यांचुञ्चौ न भवति कृपावादिलालाटिकत्वम् ।
वासो-वासाशनवितरणं कस्यचिन्नोपभुङ्क्ते
विद्वान् विप्रो मनुनयविदाऽवेयते स्पष्टमेतद् ॥

२०

अद्धा श्रद्धाञ्जलिरविरतं दीयतां वा भवद्भिः
संगायद्भिर्विमलचरितं नेमुनेर्रहितस्य ।
शृण्वन्नार्तस्वरममुमसौ संविधाता दविष्ठं
क्षोदीयांसं नयमरमरीभाविनं नो दिविष्ठः ॥

२१

"भो भूस्वामिन् ! शरणद ! मुने ! देवदूत ! प्रभो ! ने !
किन्नेदानीमवनिमवसि स्वप्रजाश्रीयमाणाम् ? ।
यद्यप्यस्मन्नयनविषयो मा मवान् सांप्रतं भू-
त्संजीवामो वयमिह समे तावकाः स्वोय-देशे ॥

२२

आक्रान्ताः स्मोऽविरलविपदा संक्षताद्दुर्बलाना—
मात्मत्राताऽद्यतनसमये क्षत्रशब्दाभिधेयः ।
स्वर्गं याते पि ।रि भवति स्वार्थकामाः सदम्भाः
संबाधन्ते विकृतमतयः सत्पथं तावकीनम्" ॥

२३

नैतर्हीदृग्गणपरिगतः क्लेशयामि स्वकीया–
मन्तर्वृत्तिं परमतपसा भेदमोहं विधोष्ये ।
एकीभूतं बहुविधगतिं जीवमात्रं प्रपश्यन्
मायां तीर्त्वा कपटरहितं ब्रह्म लप्स्येऽविनाशि'' ।।

२४

व्याहृत्यैवं स समधिगतस्तप्तुकामस्तपस्यां
गुल्मीप्रान्तं हिमगिरिवनं गण्डकीकूलसंस्थम् ।
प्रत्याकर्षन् विषयपदवीं धावतो हीन्द्रियाश्वान्
तस्थौ ध्याने नियतवसतिः शोषयिष्यञ्छरीरम् ।।

२५

कञ्चित्कालं स मुनिरपिबद्गण्डकीपूततोयं
तत्संस्पर्शिश्वसनभरणो यापयामास कञ्चित् ।
रुद्धप्राणः परमपुरुषं चिन्तयन्नुग्रतेजाः
सञ्जातोऽसौ त्रिदशपतिभीहेतु-रेतन्महिम्ना ।।

२६

वृत्रारातिः स्वपदविहतिं शङ्कमानो जगाद
प्रम्लोचाख्याममरनगरीगौरवं वारयोषाम् ।
याऽसीत्सृष्टावनुपमकलां निर्दिशन्ती विधातु–
र्दैत्येन्द्रान्तःकरणहरणी मोहनी वेष्णवी वा ।।

२७

'भो प्रम्लोचे शशिमुखि ! शुभे ! याहि नेपालदेशं
यत्राजस्रं विलसति नदी गण्डकी पुण्यतोया ।
गण्डस्वेदाद् विहिततपसः श्रीहरेः संवहन्ती
शालग्रामोपधिविलसितै र्निर्जरैः पूतदेहा ।।

२८

आचिच्छित्सुः सुरपतिपदं देवदत्ताभिधानो
विप्रस्तत्राचरति सुचिराद्दुष्प्रधर्षां तपस्याम् ।
संपश्याम्यौपयिकमितरं नान्तरा सुन्दरि ! त्वां
यस्या हस्तेऽस्ति मम निहितं धारणं पातनं वा ।।

२९

संप्राप्यार्षिं सुरभिमलयश्पर्शनानङ्गकैस्तै–
र्नृत्यक्रीडाललितमधुरै र्विभ्रमै र्गीतमिश्रैः ।
संल्लापैः स्वैः श्रुतिसुखकरै र्मञ्जुवाक् ! रुच्यहासैः
प्रत्यागच्छेः सुतनु भयदं तद्व्रतं सन्निरस्य ।।''

३०

श्रुत्वैवं सा हरिनिगदितां भारतीं भीमतीं तां
श्वासोद्वेगातिशयभरतोऽस्पष्टवर्णस्वरूपाम् ।
आयास्यन्ती क्षितितलमसौ चञ्चला देवदेवी
प्रादुर्भूता जलदरहिते व्योम्नि सौदामनीव ।।

३१

संप्राप्ता सा गगनतलतोऽधः पतन्ती हिमाद्रेः
कूटं पूर्णस्वसुकृतफलस्वर्गिदृश्या, दधाना ।
विद्युच्छोभां सितजलधरे प्रस्फुरन्तीं, चचाल
शान्तेऽरण्ये हरिणनयना तापसाभिप्रपित्सुः ॥

३२

भूतग्रामप्रभवलययोर्हेतुभूतं विशुद्धं
पारेमायं विमलमनसा शाश्वतं ध्यायमानम् ।
वल्मीकान्तर्निहितवपुषं स्थाणुकल्पं महर्षिं
दूराद्दृष्टवा चकितचकिता चाभ्युपागात्कृशाङ्गी ॥

३३

यस्या आसन् मलयपवनः पंचबाणो वसन्त—
स्तृप्ता दृप्ताः किल सहचराः किं भयं क्वापि तस्याः ।
प्रावर्तिष्ट त्रिभुवननटी नर्तितुं सार्धमेभि—
र्गातुं चोच्चै र्मुनिवरपुरः क्रीडितुं कन्दुकेन ॥

३४

तस्या गीतं सरसमधुरं श्रोत्रसृत्या महर्षेः
प्रापत्तूर्णं हृदयकुहरं, मध्यमां गामतोत्य ।
येनाविद्धा प्रजपविषया निर्विकल्पप्रबोधा
पश्यन्ती वाक् , शरविधुरिता कन्दरस्था मृगीव ॥

३५

उन्मील्य स्वे नयनकमले तापसो भग्नयोगो
ऽदर्शद्दिव्याममरयुवतीं नृत्यमानां पुरस्तात् ।
सभ्रूभङ्गं चपलनयने चालयन्तीं चलन्तीं
मन्दं मन्दं द्विरदगमनां सूक्ष्मवासोवसानाम् ॥--

३६

पीनोत्तुङ्गस्तनविलसितं बाहुमध्यं दधानां
दीर्घापाङ्गीं चपलचिकुरश्च्योतदम्लानमालाम् ।
संल्लापैः स्वै र्जितपरभृतां पक्वबिम्बाधरोष्ठीं
कामोद्दीप्तिप्रशममनसो वेधसः शिल्पराशिम् ॥

३७

निःशेषां स्वां चिरपरिचितां तापसीयां सुशिक्षां
हित्वोदस्थाद्द्रुततरमसावासनाद्भूमिदेवः ।
भ्रान्तस्वान्तो विकलविषयस्तामुपेत्य प्रमोहात्
प्रेमाविष्टो मधुरवचसा वक्तुमेवं प्रवृत्तः ॥

३८

"का ते माता ? क्व ननु जनको ? भ्रातरो वा कुतस्ते?
देशः को वा तव जननतोऽलङ्कृतो भूरिभागः ? ।
योग्यासि त्वं धरणिरमणप्राङ्गणे क्रीडितुं वा
देवोद्याने कथमिव वनं कण्टकाकोर्णमेता ? ॥

कष्टम् ! चेतो विधुरयति ते पेलवं पादयुग्मं
दर्भप्राये शिखरिविपिने कृच्छ्रतः स्थाप्यमानम् ।
त्वद्गीतेनाकुलितहृदयो विक्लवः कामपि द्राग्
बाधां प्राप्तोऽस्मि दुरवगमां जीवितं रक्ष्यतां मे" ॥

४०

एवं तस्मिन् कथयति दृशावाक्षिपन्तीतरत्रो–
त्पात्योत्पात्य स्वकरकमलालङ्कृतं कन्दुकं सा ।
क्रीडन्ती स्मापसरति विहायेव तस्याभिलाषां
वामानीतिर्नयविनयतो दुर्नया योगिनाऽपि ॥

४१

"एषा योषा मम सुरपति-प्रेषिताऽनुग्रहार्थं
कल्पद्रुर्वा प्रकृततपसो दिव्यपुष्पं प्रसूते ।
योगं भोगं युगलमपि वा प्राशशस्यन् महान्तो
रागो भागः प्रथितयशसां, प्राप्तिशून्ये विरागः" ॥

४२

कामेनैवं हृतमतिरसौ तर्कयन् वैपरीत्यं
मीनस्वामी बडिशनिहितं कोटकं व प्रलोभी ।
तां तन्वङ्गीमविरलगतिस्त्यक्तलज्जोऽन्वधावद्
रामा दृष्टा हरिहरविधीश्चापि संमोहयन्त्यः ॥

४३

आश्लिक्षत्तां सुरभिवपुषं स्मेरवक्त्रां वधूटीं
लज्जाव्याजावनतवदनां वेप्यमानाङ्गयष्टिम् ।
प्रेमाधिक्यात् कुटिलनयने कृत्रिमक्रोधयुक्ते
दर्शं दर्शं रचितविविधक्रीडनीयप्रबन्धाम् ॥

४४

गुञ्जन्मत्तभ्रमरविकसत्पङ्कजैः शोभमाने
कासारे, वा हिमगिरिवने गण्डकीसीकरार्द्रैः ।
धीरस्पर्शि-प्रसरदनिलैः सेविते हृद्यदेशे
वीताशङ्कं विहृतिपरयो रेनयोस्तत्र तत्र ॥—

४५

लास्यं, हास्यं, रुचिरशयनं, कुञ्जवासो, विलासो,
दिव्या भोगाः प्रकृतिसुलभाः कामवैदग्ध्ययोगे ।
एतत्सर्वं शतसममितं कालमैकाहयन्नो
तृप्तिर्जाता मदनजनिता हन्त! संसारचक्रम् ॥

४६

अन्येद्युस्तौ सलिलसविधं क्रीडमानौ तटिन्याः
प्रापद्येतां मुनिरपि हठादुन्मना लक्ष्यमाणः ।
अन्तश्चक्रापगमधिगतश्चेतसश्चेतयित्रीं
दीप्तिं लेभे द्रुततरतिरोभाविनीं भाविनेयाम् ।

४७

'हा ! धिग् वेश्याकपटुता-मोह-निन्द्यप्रवृत्ति
नारीभावैरपहृतधियं, व्याहरञ्छब्दमेवम् ।
बुद्ध्वाऽत्मानं दुरितचरितं कम्पमानाखिलाङ्गो–
ऽरोरोदुच्चै र्विफलिततपा दुर्मनायाप्रतप्तः ॥

४८

अग्रे दृष्ट्वा क्षपितनियमां प्रस्फुरद्गर्भमन्दां
देवीमस्तोन्मुखशशधरक्षीणशोभामुवाच ।
'प्रम्लोचे ? मन्नियमहनने दूषणं ते न मन्ये
दैवी माया प्रभवति यतः स्नेहबद्धोऽहमेव ॥

४९

मुक्तेर्मार्गं मृगयति गणो मद्विधानां न तुच्छा–
मैन्द्री-मृद्धिं समवगणितां भङ्गुरां भ्रान्तितोऽपि ।
सर्वैश्वर्यातिशयितदिवो भूतलस्यैव संपद्
श्रेष्ठा व्यर्थं सुरपतिरभूत् भीतिमान् क्षुद्रयत्नः ॥

५०

स्वर्गं गच्छेरवसितशचीनाथनिर्देशभारा
गर्भं त्यक्त्वा त्वदुदरगतं मामकं तेज एतत् ।
कन्या भूत्यै प्रभवतु भुवो मन्निदेशादिहत्या
वन्याः सत्त्वा दयितहृदया वर्धयिष्यन्ति बालाम् , ॥

एवं भूयः प्रणयिवचसा सान्त्वयित्वा सुकेशीं
ध्यात्वा देवान् विहितसवनो गण्डकीपूर्वभागे ।
संयातोऽसौ सपदि भृगुतुङ्गाख्यमेकान्तदेशं
रम्यं शान्तं स्वकुलपुरुषैः पावितं कार्यशेषात् ।।

५२

संप्रस्थिते प्रियतमे विमनायमाना
प्रम्लोचिका सुनयनां तनयां प्रसूय ।
शष्पाय तां वनभवाय च मन्यमाना
स्तन्यं पिपासुमवमत्य दिवं जगाम ।।

५३

प्रत्याहृतेन्द्रियगणस्तपसः फलाय
ध्यायन् गिरीन्द्रतनयाधिपतिं मुनिस्तु ।
अग्रस्थितं परिवृतं सुरसिद्धसंघैः
संदृष्टवान् पशुपतिं नियमावसाने ।।

५४

शीतांशुशीतलसहस्रमयूखभासं
वामस्थपूर्णशशिवक्रशिवासुसेव्यम् ।
दिक्पाल–माधव–विधात-समर्च्यमानं
स्तौति स्म गद्गदगिरा जगदीश्वरं सः ।।

५५

"जय जय जगतां पते ! महेश !
परम ! उमाप्रिय ! माप्रियप्रपूज्य ! ।
अभयद ! शरणागतार्तिहारिन् !
त्रिपुररिपो ! सततन्नमोऽस्तु तुभ्यम् ॥

५६

शिव ! शिव ! शितिकण्ठ ! चाष्टमूर्ते !
गिरिश ! गिरीन्द्र–सुतार्धदेह ! देव ! ।
पुरहर ! रहसि प्रसीद नाथ !
विफलतपाः शरणं गतोऽस्मि दासः ॥

५७

अपि किल कलिकालकालितोऽहं
गणप ! भवद्–गणतन्त्रतां समीहे ।
नवनवभविकस्य संभवोऽस्तु
भवदनुकम्पित एष मर्त्यलोकः ॥

५८

मदनमदविमर्दनप्रचण्ड–
ज्वलदनलाद् भवतो बिभेमि नाहम् ।
ग्रससि नु शशिशेखर ! त्रिलोकीं
न तु तव भृत्यजने विपत्तिलेशः ॥

५९

भव ! भव भवसिन्धुनाविको मे
हर ! हर दुष्कृत-दुःखसन्ततिञ्च ।
नियमय यमयन्त्रणाद् वराकं
नय नयनत्रितयाञ्चितात्मभावम् ॥

६०

जय जय जगदीश्वर ! त्रिशूल-
धर ! धरणी रणतन्त्रतोऽवनीया ।
न भवतु विपदां पदं नृजातिः
प्रशमसुखी सम एव ना समस्तु ॥

६१

अथ यमनियमप्रसादलभ्यो
नवभवदीयकृपाफलोपहारः ।
उदयति, भवतात्तदा धरित्री
प्रकृतिहितार्थविकासिहृद्यहासा ॥

६२

उदयतु भगवान् सहस्ररश्मि-
र्हृदयहरं स्मितमेतु शैलराजः ।
विकसतु नवतर्षपङ्कजन्म,
मनुजमनः-सरसी-विराजमानम् ॥

६३

परिभवविभवौ समीभवेतां
प्रसरिसरीतु समीरणःप्रशान्तः ।
अपनय नयदोषमेष देशो–
ऽमरवसति र्भवतात्सदर्थदर्शी" ॥

६४

एवं स्तुतो गिरिसुतादयितो महेशः
प्रेमस्मितैर्द्विगुणयन्नमृतांशुरश्मीन् ।
अभ्यर्थनामनुसरञ्छरणागतं त–
मापन्नपालनपरः समुवाच देवः ॥

६५

"ऋषे ! कृतार्थोऽसि सुदुश्चरस्ते
सुरेन्द्र-सन्तापकरो महीयान् ।
शरीरिणां भूवलयाऽलयाना–
मनर्घभव्यो नियमः समाप्तः ॥

६६

वृषाकपी भेदधिया प्रपश्यन्
अभूर्विलुप्तक्रिय आदितस्त्वम् ।
अभेदबुद्धौ तपसा परेण
प्राप्तः परेशं विशदस्तवात्मा ॥

६७

नरेषु, नारीषु, मनुष्यजातौ,
तिर्यक्षु, चैकं प्रतिभासमानम् ।
मायातमिस्रावृतशुद्धरूपं
सनातनं ज्योतिरवेहि वत्स ! ॥

६८

अभञ्जयाम प्रथमं तपस्ते
सेन्द्रा वयं त्वत्स्पृहयोत्सुकत्वात् ।
स्वर्गीभवद् भूतलमीक्षितुं प्राक्
संकल्पितं ते परिपूरणीयम् ॥

६९

मन्दारमाला त्रिदिवाच्च्युतेवा–
ऽप्सरोभवा त्वत्तनया स्वकीयम् ।
आमोदमासागरमाकिरन्ती
निवत्स्यतीहैव तपोविशुद्धा ॥

७०

निःशेषकार्यं त्वदभीप्स्यमानं
करिष्यते विश्वजनीनमेषा ।
विभक्तभारोऽसि तपोनिधान !
नृपो यथा यूनि सुते समर्थे ॥

७१

एका तपस्या भुवनावनाय
कैवल्यसँल्लाभकरी द्वितीया ।
मनोरथान् पूर्णफलान् प्रकृष्टान्
जानीहि वत्सोभयतः क्षणेऽस्मिन् ॥

७२

स्वगौरवाबोधविमोहितत्वाद्
दुःखाग्निदन्दह्यहृदो जनस्य ।
दव्यादविद्यातमीमालयन्ते
रोचिष्णुरात्मोष्णमयूखकान्तिः ॥

७३

मात्रीयतां ब्रह्ममहोमहिम्ना
नेपालमाता जगतोऽखिलस्य ।
षडङ्गवेदार्थधियः सुधीन्द्राः
श्रेयस्करीं पद्धतिमाप्नुवन्ताम् ॥

७४

कायेन वाचा मनसा कदापि
न मानवा नृनवधीरयन्तु ।
सर्वे लभन्ता-मुचिताधिकारं
प्राणावनाय द्रविणार्जनाय ॥

७५

एकस्य तावत् परिपोषणार्थं
सहस्रशो वध्यतया न कल्प्याः ।
समानसम्मानमतः समन्यु-
र्भवेत् त्वदीयेन यमेन वत्स ! ॥

७६

समुद्गतं सर्वजनेषु तीव्रं
वैमत्यजातं तव कार्यकाले ।
समीक्रियात् त्वत्तनया, भवान्तु
निःश्रेयसं गच्छतु गीतकीर्तिः ॥

७७

मज्जन्तु सर्वे खलु चक्रनद्यां
जपन्तु सर्वे हरिनाम पूतम् ।
चिन्ता-चिता रोदितु भग्नवासा
भवन्तु लोकाः सुसमृद्धिभाजः ॥"

७८

इति स ऋषिवरं तं मेदुरां वाचमुक्त्वा
प्रमथगणसहायोऽन्तर्बभूव त्रिनेत्रः ।
मुनिरपि हरलाभे ध्वस्तभेदप्रमोहो-
ऽलभत गतिमभीष्टां योगसंसाध्यमानाम् ॥

७९

इति प्रथमो भागः

द्वितीयो भागः

—:०-❀-०:—

प्रसूप्रहीणा प्रसवावसानतः
स्तनार्थिनी शुष्कमुखी शिशुस्तदा ।
समुत्क्षिपन्ती चरणौ सुकोमलौ
भुजौ च चक्रन्द तटेऽसहायिका ॥

१

तमद्भुतं शब्दमतर्कितश्रुतं
दवीयसं बालसुलभ्यमञ्जुलम् ।
निशामयन्तो रुरवः कुतूहला—
त्किमेतदित्याकुलिताः समाययुः ॥

२

उपेत्य ते तादृगलक्षितप्रभा—
प्रभावचित्रीयितचित्तवृत्तयः ।
मयूखविक्षेपतिरस्कृतेन्दुकां
नवार्भकां दिव्यतयाऽनुमिम्यिरे ॥

३

"अहो कुतश्चन्द्रमुखीयमागता ?
गतौ क्व वास्याः पितरौ च निर्दयौ ? ।
किमर्थमस्या इह वा समागमो ?
नदीतटोद्देशविसर्जिता कुतः ? ॥

४

असह्यकाराभवनाभिलाषिभि–
रनागतार्थ - प्रभवप्रमाणिभिः ।
अरुन्तुदैर्ज्यौतिषमानिभिः शिशु–
र्नवा न वा मूलभवा विहापिता ? ॥

५

कथाचन प्रेमरसार्द्रचेतसा
प्रसेवितश्चोपपती रहो-गतः ।
ततश्च गर्भं दधती समाजभी–
पलायितेमां विरहय्य किं द्रुता ? ॥

६

निरर्थकं भर्तृनिपीडितः सती–
वधू समूहः समवेतशक्तितः ।
समाधिकारादरमार्गणोऽम्बिकां
भवप्रियां मन्त्रितवानुताऽधुना ? ॥

पुरा प्रजाक्रन्दन–दुःखिताः सुराः
सलोकपाला महिषस्य मर्दनम् ।
विभाव्य, संभूय, विचित्ररूपिणी–
मबीभवन् शक्तिमतः प्ररक्षिताः ॥

८

अमी इहास्माकविलापकर्शिताः
सरिज्जलान्तर्निहिताः शिलामयाः ।
तथैव सिंहासुरकर्तनोत्सुकाः
स्वशक्तिराशिं समकल्पयन्नुत ? ॥

९

मृगाधिपग्राह्यबलित्वसंशये
मृगेन्द्रतावश्यकतानिराकृतिम् ।
विविच्य देवैः प्रहितेयमद्य नः
समानमानान् सुखिनः करोति किम् ? ॥

१०

उतार्तशोषोत्सुकभारदुर्भरां
वसुन्धरां वोढुमशक्तिमान् फणी ।
इमां समर्थां प्रहिणोति पुत्रिका–
मपोयमापास्यति दुष्टशासनात् ? ॥

११

उदन्वता वा तनये निशाकरे
नभः पतौ भूपतिरन्यमिच्छता ।
प्रचोदिता प्रेयसिका च गण्डकी
सुतां प्रसूताऽवनिपालनाय किम् ? ॥

१२

"न केवलं स्यन्दनतो हिमालया–
त्समुद्रपर्यन्तमवैमि साधनम् ।
ज्वलद्द्रणाग्निः प्रलयांशुमन्निभः
प्रशम्यतामर्हति शस्त्रकै र्विना ॥"

१३

विमृश्य चेत्थं विजिहीर्षया भुवि
शिशूभवन्ती तटिनीयमुद्गता ।
अपीयमाविश्य मनांसि देहिना–
महिंसया क्रान्तिनिरासिनी भवेत् ? ॥

१४

यशोदिकागर्भभवा महेश्वरी
नृशंसकंसाहृतमुक्तबालिका ।
हतत्रपं राजकमीक्ष्य किं नभः–
पथेन पुण्यस्थलमेतदाश्रिता ? ॥

१५

सदातनज्ञानसमीहयाऽऽगतः
पुरातनो व्यासमुनि र्हिमालयम् ।
तमम्बिका मेघगणाऽऽवृताऽब्रवीद्
यथार्थतत्त्वं श्रुतिभागकल्पने ॥

१६

किमद्य साऽविर्भवति प्रभावती ?
यया जगद्भव्यभविष्यदिच्छया ।
प्रदर्श्यतां न्याय्यपथः समुज्वलो–
ऽपसार्यतां वास्तविकी ह्यसत्यता ॥

१७

अखण्डभूमण्डलमस्तकोल्लस–
न्मणीयितोदग्रहिमालयाऽलया ।
अपि स्विदेषा सुखयेज्जगत्त्रयं
विनीय विश्वं विततोरसोर्जिता ? ॥

१८

किमप्यदो वस्तु विचित्रदर्शनं
सुशक्यरक्षं वनगोचरैरपि ।
समीक्ष्यतां स्तन्यपिपासयाऽक्षमा
स्वजीवनं धर्तुमियं प्रगृह्यताम्" ॥

१९

इति ब्रुवन्तो रुरवः परस्परं
स्ववासमानिन्युरनाथबालिकाम् ।
जलैः फलैः पल्लवकैर्यदृच्छया
समैधयन् प्रेमपरम्परापराः ॥

२०

अहो ! विचित्रं मनुजस्य सन्तति–
रुपेक्षिता वन्यमृगैः सुरक्ष्यते ।
यदुच्यते चेतनचेतनो नरो,
मृषाप्रवादः प्रतिभाति तत्त्वतः ॥

२१

न विस्मयो वा परमात्मनः कृति–
श्चकास्ति तुल्या नृषु चान्यजन्तुषु ।
उदग्रता-निम्नतयो मंदो वृथा
व्यवस्थितेरन्यतया शरीरिणाम् ॥

२२

इमां रुरूणां निवहे प्रवर्धितां
वदन्ति नाम्ना रुरुमेव लौकिकाः ।
यदागमास्तद्व्यपदेशभागिनो
बलीयसी वा समुदायविश्रुतिः ॥

२३

वयोऽधिकेष्वाहितपूज्यभावना
प्रपन्नसोदर्यमतिः समेषु च ।
कुमारिकाऽवर्धत पुष्टविग्रहा
रुरू रुरुघ्नातमनोऽतिवल्लभा ॥

२४

तरक्षवो वा हरयोऽथवा नगा
वराहभल्लूकवनौकसोऽपि वा ।
समीक्षमाणा रुरुकन्यकामुखा-
कृतिं ययुर्निश्चलतां द्रुमा यथा ॥

२५

मृगार्भकैः सार्धमजस्रखेलनैः
सरिद्वरापूतपयोऽवगाहनैः ।
प्रमोदसन्दोहभराऽपि शैशवं
व्यतीत्य चैवं स्वजनानवोचत ॥

२६

"सहायहीना जननीप्रतारिता
भवद्दयालुत्वमवाप्य पालिता ।
तपोनिधेः विप्रवरस्य कन्यका
पितुः पथाऽहञ्च तपोऽभिलाषुका ॥

२७

समागमो बन्धुजनैः प्रपायते
नवं वयो वन्यसुमायते तथा ।
कृमित्वभूतित्वदशा शरीरगा
विनश्वरं स्वप्नसकाशजीवनम् ॥

२८

अतो यथाशक्ति हरेः समर्चनं
विधातुकामाऽस्मि जपोपचारकैः ।
प्रदीयतां मेऽनुमतिः समेधिता
रहोविवत्सा बलवन्निनीषति" ॥

२९

निशम्य तावद् रुरवोऽसुखावहं
वियोक्ष्यमाणा-वचनं सुविस्मिताः ।
प्ररूढतारुण्यलसत्कलेवरां
विवाहयोग्यामिदमूचुरादृताम् ॥

३०

"मनोरमे ! देवि ! कुरङ्गलोचने !
प्रगाढकामे ! परिपुष्टयौवने ! ।
विहाय सर्वं धरणीगतं सुखं
कथं प्रियो निर्धनवल्लभो हरिः ! ॥

३१

प्रिया न ते राजकुमारकाः कुतो
धनेन रूपेण गुणेन गर्विताः ? ।
प्रजासु वा कश्चन सुन्दरो युवा
कथन्न वृत्यो भुवने यथारुचि ? ॥

३२

त्वदीयपादौ मणिकुट्टिमोचितौ
कथन्निधेयौ कुशकर्कशे वने ? ।
महार्हवस्त्राभरणोचितेऽङ्गके
न किं भवेद् हास्यपदं हि वल्कलम् ? ॥

३३

भवेः सदा राजवनीविहारिणी
बलाहकस्पर्शिगृहाधिवासिनी ।
बहुश्रुता भूपवधूश्च सञ्चितं
धनं विकीर्यापि विदेशचारिणी ॥

३४

न रोचते यर्हि विलासिता तदा
स्वसम्मतीर्भूपतये प्रदाय च ।
पुनः पुनः शोषकवर्गपीडिताः
प्रजाः समुज्जीवय राष्ट्रसम्पदः'' ॥

३५

अगाधसंसारसमुद्रमज्जन–
प्रदर्शितानन्दविलोभधर्षिता ।
तदर्हतापाकृतिकर्मनैपुणं
प्रबोधयन्तीदमुवाच सा रुरून् ॥

३६

"क्व सन्ति शान्ता गुणपक्षपातिनः ?
क्व वा क्रणेहत्य धनेन तर्पिताः ? ।
असंहृते शाठ्यविरोधविप्लवे
कृतं हिरण्येन नृपासनेन च ॥

३७

वचस्ततौ वाक्पतिमानिनः पर–
न्न कर्मणः कर्तृतया प्रयासकाः ।
*विवक्षितं कर्म भजेच्च कर्तृतां
न संप्रदानस्य कदापि कर्तृता ॥

३८

---

* अयम्भावः–यथा कर्मकरणाधिकरणानां कर्तृत्वेन विवक्षायां 'पच्यते ओदनः 'असिश्छिनत्ति' 'स्थाली पचति, इत्यादिप्रयोगा भवन्ति, संप्रदानापादनयोस्तु तथाविवक्षायामपि 'ब्राह्मणः स्वयमेव ददाति' 'वृक्षः पतति' इत्याद्या न भवन्ति, एवमिहापि कृते वेतनादिप्रदाने प्रारभ्यमाणं कार्यं सुकरं भवति, परन्तु द्रव्यव्ययो दुष्करः। अहो महदाश्चर्यम् ? वागाडम्बरेणैव रात्रिमपि दिवसयितुमिच्छन्ति ।

समानवादे नयदुन्दुभिस्वनः
कदा कदुत्कोचनयश्चलिष्यति ? ।
रुवन्ति सर्वे 'वसुधा कुटुम्बकम्'
रुदन्ति सन्तोषयितुं परिग्रहम् ॥

३९

समा भवेद् मानवता, न जातितः,
पृथिव्यभेदेऽपि पटेतरो घटः ।
न वर्णवादो यदि रोचते तदा
स्ववर्गवादोऽपि न रोचतान्तराम् ॥

४०

स्त्रियोऽधना निम्नगताश्च जातयो
निराश्रया दादलिता यथातथम् ।
अशान्तिसाम्राज्यकदर्थने दृढे
लपन्ति मोघं किल विश्वशान्तये ॥

४१

हृदो गरिम्णा परिवर्धिते जने
प्रयत्नशीले स्वचरित्रनिर्मितौ ।
तथात्मविश्वासमनोमलक्षतौ
समो जनः स्वं सहसा विनेष्यते ॥

४२

न मेऽधुना वृत्यवरोऽवलोक्यते
विवेकतो दृष्टिनिपातनेऽपि कौ ।
स्थिरीक्रिया नैव तिरस्क्रिया न मे
प्रवृद्धवादान् अधुना निबोधत ॥

४३

"भुवन भुवने वनावनाद्
हवनात्प्लावनमेति नावनिः ।
असवोऽसुमतां विनिर्गता
यवदाहो वद जीवनं कुतः ? ॥

४४

अपवित्रहयाय नार्हतो
यवदूर्वे यदि पावने तदा ।
अथ तद्विपरीतके कथं
सुपवित्रेषु मखेषु चार्हते ॥

४५

पुरुषो बहुभार्य ईप्सितो
महिलाः स्युर्बहुभर्तृका न किम् ?।
समयः सम एव मृग्यतां
पुरुषश्चेदधिवेत्तुमिच्छति ॥

४६

विधवा विमलाऽबला यदि
पुरुषः किं व्यबलो न तिष्ठति ?।
विधवास्तु पुनर्विवाहिता
ननु तस्मिन्नपराञ्जिघृक्षति ॥

४७

द्विजशूद्रनिषादपुल्कसा–
स्तनया ब्रह्मण एव सर्वके।
तव जातिविभेद-कल्पना
नरजातेः पतनस्य कारणम् ॥

४८

वितरणीयतया धरणी वृथा
न तरणी किल वैतरणीगता।
न सरणी शरणीकरणीयता--
मघवतां गमिता मरणादनु ॥

४९

न भवनं द्युसदां न शतक्रतुः
सुमनसोऽपि नभःसुमनायिताः।
निरयदुःखमिहैव 'दरिद्रता'
त्रिदिवसौख्यमिहैव 'सुसम्पदः' ॥

५०

दिवि गतो जनको जलपिण्डभुग्–
भवति चेत्स्वसुताय लिखेत्स्मृतिम् ।
अथ विदेशगताय च दीयतां
गृहत एव हि पिण्डकुशोदकम्" ॥

५१

× × ×

शरीरसौन्दर्य सुवर्णसञ्चया–
वपेक्षितौ मे न वरस्य मार्गणे ।
अमोघसङ्कल्प-सुपूतभावना–
प्रचालिता लोकगति वंरिष्यते ॥

५२

अधीनतां स्वां समवाप्स्यथः पुनः
कदाचन क्रूरवशीकृता अपि ।
परीभवानन्तरभावि वैभवं
निशावसाने दिवसोदयो यथा ॥

५३

शरारुबाधाजनिता विपत्तय--
स्तिरोभवेयुस्त्वरितं मम व्रतैः ।
वसन्तु सर्वेऽत्र भवन्त आदृता--
श्चिरार्थिता शान्तिरवश्यभाविनी" ॥

५४

इति ब्रुवाणा सहसैव गण्डकी–
जलाप्लुता तीरसमीपवर्तिनम् ।
विविक्तदेशं पितुरादिमाश्रमं
विवेश चित्ताहितलोकरक्षका ॥

५५

निमज्जनध्यानफलाशनादिभि–
र्व्रतञ्चकारादिममासि साऽन्वहम् ॥
शनैः शनैस्त्यक्तफला च सप्तमा–
त्परेषु मासेषु दृढव्रताऽभवत् ॥

५६

निमीलिताक्षी तरुवत्सुनिश्चला
विशुद्धचेतो·हरिमात्रभावना ।
निरुद्धवायुः शरदः शतं स्थिता
यदर्थकृष्टो भगवानुपागतः ॥

५७

नियम्य तद्ध्यानपथाद् विनिर्गतो
हृषीकमाराधिकया स ऐक्ष्यत ।
ततो हृषीकेशसमाख्यया जग–
त्प्रभुः प्रसिद्धो गुणकर्मनामकः ॥

५८

हृदिस्थरूपं वहिरप्युपस्थितं
कृपानिधिं शान्तसमुज्ज्वलाकृतिम् ।
निलोकयन्त्या मुखतो विनिर्गतो
ध्वनिः स्तुतौ वैकृतनामधेयकः ।।

५९

"जय नाथ ! अनाथपालक !
जय सर्वेश्वर ! शान्तदर्शन ! ।
जय शम्भुविरिञ्चिपूजित !
जय लक्ष्मी-हृदयेश्वर प्रभो ! ।।

६०

जय देव ! अनन्तशक्तिक !
जय दामोदर ! मोक्षदायक ! ।
शरणागतपाल ! नायको
भव पारे-भवसागरं मम ।।

६१

रजसा तमसाऽथ सत्त्वतो
जगतः सर्गलयौ स्थितिश्च ते ।
नटभूमिकया प्रपञ्चग !
त्रिगुणात्मन् ! सततन्नमोऽस्तु ते ।।

६२

अमरा असुरा महर्षयो
मरुतः सिद्धगणाः सरिद्वराः ।
निवसन्ति भवन्मुखाम्बुजे
जय विश्वात्मक ! विश्वलोचन ! ॥

६३

व्यवहारदशास्तितासहं
तव सत्त्वेन विबोधगोचरम् ।
उरगायितमीक्ष्यते जग–
द्रशनायां परमार्थवित्तमैः ॥

६४

तमसा निबिडेन संवृतं
कुरुषे विश्वमिदं प्रकाशितम् ।
महता महसाऽन्यथा क्षणे
विलयं यातु चराचरात्मकम् ॥

६५

विहितप्रतिपादिका श्रुतिः
फलसापेक्षतया न वास्तवो ।
अपयाति धियो विरोधिनी
तव साक्षात्करणे भिदामतिः ॥

६६

प्रकृतिप्रतिबिम्बनान्मृषा
तव कर्तृत्वमबोधहेतुकम् ।
स्फटिके विमले जलेऽपि वा
कुसुमादेः शशिनश्च संभ्रमः ॥

६७

जननी-जनकौ न जानतीं
प्रभुसेवा विधिना प्रदर्शिता ।
सकलाः सफलाः क्रिया यतः
पुरतो मे भगवानुपस्थितः ॥

६८

इयमाकृतिरस्तु तावकी
मम चित्ते ह्यनपायिनी तथा ।
चिरकालसमीहितो भवा-
निदमध्युष्य महीयतां सदा'' ॥

६९

श्रुत्वा गुरोर्निगदितं रससारयुक्तं
संप्रार्थनात्मकममोघमनोरथार्थि ।
भक्तिप्रभाववशगः स्मितवक्रपद्मा-
दाकीर्णहास्यकिरणो हरिरेवमूचे ॥

७०

"आराधितो देवि ! महाव्रतेन
प्रत्यक्षतामागतवान् तवाहम् ।
अर्था न देया न हि केऽपि तुभ्यं
वश्या त्रिलोको भविता तव श्वः ॥

७१

चूडायितो भूशिरसि प्रशोभी
नेपालदेशोऽस्ति नग-प्रदेशः ।
तस्याऽपि मध्ये मुकुटायमानं
क्षेत्रं त्वदीयं वरिवर्ति वत्से ! ॥

७२

हिमालयोत्सङ्गविराजमानो
देवैस्तपस्यार्थमकल्पि देशः ।
रागोपहासं परिहृत्य बाले !
त्यागप्रकाशोऽत्र विवर्धनीयः ॥

७३

नदीषु शैलाधिपवाहिनीषु
त्वदग्रगा चक्रनदी वरिष्ठा ।
विधिर्महेशो मुनयोऽथ देवा
अहञ्च यस्या हृदये वसामः ॥

७४

गायन्ति गन्धर्व-गणाः सुराणां
नृत्यन्ति रामा नयनाभिरामाः ।
विद्याधराः किन्नरयक्षसंघा
अमन्दहर्षा इह संवसन्ति ॥

७५

अमर्त्य-सिद्धर्षि-तपोनिधानैः
समाश्रिता पूज्यतया सदैव ।
स्रवन्नदी-निर्झर-रम्य-शैला
नेपाल-भूः स्वर्गमधः करोति ॥

७६

कैलाशनाथः श्वसुरालयार्थी
महोक्षमारुह्य गणैः परीतः ।
प्रियासखः क्रीडति यत्र बाले !
तत्र स्थिता द्रक्ष्यसि जीवलोकम् ॥

७७

मदेन मानेन बलेन दृप्ता
यदा स्वतो न्यूनबलान् विहिंस्युः ।
तदात्मशक्तिं वितरन्त्यपूर्वा–
मजय्यतां प्रापय शक्तिशून्यान् ॥

७८

कलं स्वनद्भिर्गिरिनिर्झरैस्ते
यशोऽमलं गास्यत एव शश्वत् ।
इह स्थिता पास्यसि सर्वविश्वं
प्ररोहयन्ती नवभव्यवल्लीम् ॥

७९

अहं निवत्स्यामि रुरो ! त्वदर्थे
मदीयसान्निध्यवतो भवन्तो ।
अलक्षिता भूतलवासिभिस्त्वं
ममाज्ञया लोकहितार्थिनी स्याः ॥

८०

इदं रुरुक्षेत्रमिति प्रसिद्धं
त्वदीयतीर्थं दुरितापहारि ।
अशान्तिरन्तर्बहिरासिनी द्राग्
दविष्यते त्वत्स्मरणान्नराणाम्" ॥

८१

इत्युक्त्वा जगदधिपस्तिरोबभूव
पश्यन्तीं मुनितनयां विशारदिम्ना ।
मर्त्यानां नयनपथादलक्ष्यमाणा
सेवायामसुररिपोः प्रवर्तिता सा ॥—

८२

स्वक्षेत्रे कृतवसति र्महीगतानां
जीवानामविरलभावुकाभिकामा ।
स्तौति प्रातरनुदिनं विनम्रभावा
कृष्णाख्याममृतवहां, निदर्शनं तु ।।—

८३

"हिमालयीयाच्छिखराद् विनिर्गता
पवित्रयन्ती क्षितिमामहार्णवम् ।
त्वमेव लोकं परिपासि सर्वथा
नमोऽस्तु ते गण्डकि ! विश्वपावनि ! ।।

८४

अबुद्धितो बुद्धित एव वांऽहसा
विलिप्यमानो भवतीमुपासिता ।
विशुध्यते किं पुनरङ्घ्रिसेविनो ?
नमोऽस्तु ते गण्डकि ! कल्मषापहे ! ।।

८५

प्रतारितस्त्वन्महिमप्रबोधतः
प्रतापितोऽप्यंशुमतो गभस्तिभिः ।
त्वदम्बुसंपर्किसमीरनिर्वृतो,
नमोऽस्तु ते गण्डकि ! तापहारिणि ! ।।

८६

कुटुम्बभाराहतचेतसः सदा–
ऽजितेन्द्रियाः कर्मविमूढमानिनः ।
गतक्लमास्त्वत्सलिलावगाहना–
न्नमोऽस्तु ते गण्डकि ! शान्तिदायिनि ! ॥

८७

विलोकनस्पर्शनमज्जनादिभि –
स्त्वदीयसान्निध्यगताः शरीरिणः !
भवन्ति तेऽदृष्टफलोपभोगिनो
नमोऽस्तु ते गण्डकि ! पापिदुर्लभे ! ॥

८८

तवोदरे सन्ति सहस्रशः सुराः
शिलामयाः पुत्रतया प्रकल्पिताः ।
विधेयतां को न गतोऽम्ब ! तेऽधुना ?
नमोऽस्तु ते गण्डकि ! देवसेविते ॥

८९

अशक्तितस्त्वत्सविधे समागमे
त्वदीयनामोषसि ये जपन्ति तान् ।
मनोरथैर्योजयसि प्रसादिता,
नमामि शश्वत्स्मरणीय-नामिकाम् ॥

९०

स्मरार्दिता येऽधिवसन्ति तावकं
तटं जनास्तीर्थनिवासकैतवात् ।
अपीदृशेषु प्रतिकूलतां भजेः ?
नमोऽस्तु ते गण्डकि ! रौद्ररूपिणि ! ॥

९१

स्वजीविकासाधनमल्पभूधनं
ससान्त्वनं वा ललनाललन्तिकाम् ।
प्रकल्प्य विक्रेयतया ऽध्वसंपदे
भवत्प्रभावानवबोधविक्लवाः ॥—

९२

गरीयसीं पोटलिकां समुह्य ये
दविष्ठदेशाय चलन्ति, तेषु तु ।
अहो ! तवोच्चै र्हसनं तिरस्कृतौ
नमोऽस्तुते कालि ! करालरूपिणि ! ॥

९३

त्वदङ्कमुत्सृज्य दुरन्तकृच्छ्रतः
प्रयाति दूरं लघयन् तवोच्चताम् ।
नरोऽपरोऽतो न हि धिक्कृतेः पदं
न शोचनीयो न च दुःखभाजनम् ॥

९४

तपोव्रतत्याग-यमाध्वरक्रिया–
विहीनता नैव विनिन्द्यते त्वया ।
मलीमसप्रज्ञजनाः कलौ युगे
त्वयेक्षिता देवगतिं गताः सुखम् ॥

९५

पवित्रतां तावकदर्शनादियात्,
शरीरवाङ्मानसदोषदूषितः ।
अघौघमुक्ता अपुनर्भवाश्च ते,
सकृत्त्वदीयाम्बुकणं पिबन्ति ये ॥

९६

गच्छन् शयानो निवसन् ब्रुवन् हसन्
स्मरेत्तवाख्यां सततं विनीय यः ।
गतप्रयासः स भवेन्महाशय–
स्त्वदोहया संसृतिचक्रकर्तनात् ॥

९७

वियुज्यमाना असुभिस्तटे तव,
नगास्तुरङ्गाः शशकाः पतत्त्रयः ।
मगाः खरा अप्यपवर्गभागिनो
भवन्ति चेत्किं पुनरुच्चजातयः ? ॥

९८

न मज्जति त्वत्सलिले सकृच्च यो,
निरर्थके जन्म कुलं च तादृशः ।
नरो वरस्तावकमज्जनादनु
सदा हृषीकेशसमर्हणापरः ॥

९९

हरिर्विरिञ्चि र्मुनयोऽथ योगिनो
न जानते त्वन्महिमानमादितः ।
इयं वराकी किमिति प्रपद्यते ?
नमोऽस्तु ते देवि ! दुरूहवर्णने !'' ॥

१००

× × ×

जयति जगति देवो देवदत्तो द्विजेन्द्रो
जनिरिह जनताया मङ्गलार्था यदीया ।
जयतु रुरुकुमारी शान्तिसन्दोहमूर्ति-
र्हरतु विपदमेतद्देशवासा समेषाम् ॥

१०१

इति द्वितीयो भागः

संमतयः

व्याकरणाचार्य श्री पं० टीकारामशर्मणः प्रथमेयं कृतिः रौरवी कथा नाम वासन्ती मञ्जरीव माकन्दस्य मोदयति मनांसि मनीषि-सहृदय-जनानाम्—

प्राकृतीं चिरात्प्रस्तुतां पौराणिकीं गाथामादाय प्रबन्धनिर्माण-प्रवृत्तिरस्य सनातनीं परम्परां प्रति प्रेमातिशयं प्रकाशयति—

भयानकेऽस्मिन् कलिकाले कराले समये युवजनस्यास्य प्राकृत-संस्कृतिमाश्रयन्नेष प्रयासोऽस्य समुत्साहाय ममापि मनः प्रेर-यतीति सोल्लासमेतमुत्साहयन् भगवन्तं विश्वनाथमेतस्य समु-न्नतिम्प्रार्थयते—

विद्यावाचस्पति—

पं० काली प्रसाद मिश्रः

व्याकरणाचार्यः
भूतपूर्व प्रिंसिपल,
संस्कृत महाविद्यालय
का० हि० वि० वि०

सम्मानितप्राध्यापकः
वाराणसेय संस्कृतविश्वविद्यालयस्य
डी १।६ सरस्वती फाटक
वाराणसी।

संमान्याः ! सुरभारतीसेवाप्रणयिनः !

प्रस्तूयमान-रुरुवृत्तमिति-नामकखण्डकाव्य-प्रणेता श्रीटीकाराम-पन्थी शैशवादेव विलक्षणव्युत्पत्ति-पटुश्छात्रावस्थायामेव प्रतिभातिशय-प्रसादित-गुरुचरण-लब्ध-श्रुतिधरेतिपदवीक आप्रारब्ध परीक्षमाचार्यान्तं यावदविदितद्वितीयादिश्रेणीको व्याकरणे विहितपरिश्रमोऽपि समये समये कविताप्रसादित-साहित्यसुधाऽऽस्वादनशील-कवि-कुललब्धपारितोषिकः संस्कृतैकरसोऽपि परिचितांगलविद्यः प्राचीनार्वाचीन-मत मन्थन-पुरःसरं रुरुमहिमानं महयन् मनोविनोदयन् स्ववाणी-विलासं प्रस्तुत-खण्डकाव्यरूपेण प्रस्तुवन्नस्ति ।

आकारेण स्वल्पमपि गुण-गौरवगरिष्ठमिदं नूनं चमत्कृति वशंवदानां गुणैक-पक्षपातिनां विदुषां मन आह्लादयेदिति मन्यमानः सतीर्थ्यसम्बन्धेनेतद्विद्वद्वरविषये द्वित्राक्षरलेखनायानुकूलभाग्यः स्वमपि धन्यं मन्ये ।

हरिप्रसाद शर्मा आचार्यः
प्युठान-खैरा-ग्राम-वास्तव्यः ।

मुक्तिक्षेत्रबाट आफ्नो कलकल स्वरमा मुक्तिको मीठो सन्देश लिएर नेपालको हृदयमा बगेकी गण्डकीले किन आफ्नो नामको अगाडि रुरुकन्याको नाम हुनुलाई गौरव संझिन् ?, यस रहस्यलाई पछ्याउन गरिएको शास्त्रीय्यूको प्रयासले गण्डकीको जलमा अर्को मिठास थपिदिएको छ । आशा छ उँहाका यसप्रकारका अरु मीठा रचनाहरुले नेपाली जनसमाजको साहित्यिक तिर्खा मेट्ने छन् ।

गुल्मी उत्साहवर्द्धिनी समिति
वाराणसी ।